हे अङ्गिरः! अग्निरूपेति" वेददीपः। अङ्गिरसः गोत्रापत्यम् शिवा० अण्। आङ्गिरसः बहुषु लुक्। अङ्गिरसस्तद्गोत्रापत्ये ब० व०। "सर्व्वे सान्ता अदन्ताः स्युः" इत्युक्तेः पु० सलोपे अङ्गिरशब्दोऽप्यत्र, "येनानवग्वे अङ्गिरे" इति वेदः। मन्वत्रिविष्णुहारीत याज्ञवल्क्योशनोऽङ्गिरा इति याज्ञ० "एवं त्यक्त्वा शरीरं तु परमे तपसि स्थितः। भृग्वङ्गिरादिभिर्भूयस्तपसाप्यायितस्तदेति" भार०।

**अङ्गिरस्वत्** पु० अङ्गिरा अग्निः सहायत्वेन विद्यतेऽस्य मतुप् मस्य वः सान्तत्वात् न पदत्वम्। वायौ "यमाय त्वाङ्गिरस्वते पितृमते स्वाहेति" यजुः। "अङ्गिरोयुक्ताय वातायेति" वेददीपः।

**अङ्गीकार** पु० अनङ्गम् अस्वोपकरणं अस्वकीयम् अङ्गं क्रियते अङ्ग+च्वि+कृ–घञ्। स्वीकारे अभ्युपगमे। "अङ्गीकुरु दृशोर्भङ्गीमङ्गीभवतु मन्मथ" इति "नवाङ्गी कुरङ्गीदृगङ्गीकरोत्विति" जगन्नाथः। "अङ्गीकुर्वन् स्वमाहात्म्यं भृशं जज्वाल पावक" इति पुरा०।

**अङ्गीकृत** त्रि० अङ्गीति च्व्यन्तं तत्पूर्व्वकात् कृञः क्त। स्वीकृते "अङ्गीकृतं सुकृतिनः परिपालयन्तो"तिचौरपञ्चाशिका। "नाङ्गीकृतमुत्सृजन्तीति" नीतिसा०।

**अङ्गु** पु० अगि–उन्। पाणौ हस्ते "अङ्गुष्ठः"।

**अङ्गुरि(री)** स्त्री अङ्ग–उलि–रलयोरैकत्व स्मरणात् रत्वम्। (आङ्गुल) इति प्रसिद्धायाम् हस्तपादशाखायाम् वा ङीप्। अत्रैवार्थे "अङ्गुरीवोरगक्षतेति" रघुः।

**अङ्गुरीय** न० अङ्गुरौ भवम् अङ्गुरि+छ बालमूलादित्वात् वा लत्वाभावः। अङ्गुलिभूषणे (आङ्गुटीति) प्रसिद्धे।

**अङ्गुरीयक** न० अङ्गुरीय+स्वार्थे कन्। अङ्गुलिभूषणे (आङ्गुटीति) ख्याते भूषणभेदे।

**अङ्गुल** पु० अङ्ग–उल। हस्तपदशाखायाम् (आंगुल) इति ख्यातायाम्। वात्स्यायनमुनौ च। "यवोदरैरङ्गुलमष्टसंख्यैरिति" भास्कराचार्य्योक्ते अष्टयवोदरपरिमाणे तु न०। अङ्गौ पाणौ लीयते वा ड। अङ्गुष्ठे न०। "समन्तादङ्गुलोत्सेधं हस्तमात्रं तु स्थण्डिलमिति" पुरा०।

**अङ्गुलि** स्त्री अङ्ग–उलि। हस्तपदशाखायाम् (आङ्गुल) इति ख्यातायाम्। अङ्गुलिं ग्रन्थिभेदस्य छेदयेत् प्रथमे ग्रहे"इति स्मृतिः (हात शुडा) इति ख्याते गजकर्णिकाष्ठे, गजशुण्डाग्रे च। पुंस्त्वमपि "संदृताधरोष्ठमङ्गुलिनेति" शकु०।

**अङ्गुलितोरण** न० अङ्गुलेः तोरणमिव कृतम्। चन्दनादिद्वारा कृते ललाटस्थार्द्धचन्द्राकृतितिलके।

**अङ्गुलित्र** न० अङ्गुलिं त्रायते त्रै–क ६त०। (चामाटीति) प्रसिद्धे ज्याकर्षणकृतखेदवारणार्थम् अङ्गुलिबद्धे चर्म्मणि "बद्धगोधाङ्गुलित्रे" इति भट्टिः।

**अङ्गुलित्राण** अङ्गुलिस्त्रायतेऽनेन त्रै–क ६त०। (चामाटीति) प्रसिद्धे ज्याकर्षणकृतखेदनिवारणार्थम् अङ्गुलिबद्धे चर्मणि।

**अङ्गुलिमुद्रा** स्त्री अङ्गुलेः मुदं राति रा–क ६त०। धारयितुर्नामाक्षरमुद्रासहिते (आङ्गुटीति) प्रसिद्धे अङ्गुलीभूषणे। "उपहितस्मृतिरङ्गुलिमुद्रयेति" शकु०।

**अङ्गुलिमोटन** न० अङ्गुल्योर्मोटनं मर्दनं यत्र ब०। अङ्गुलिद्वयमर्दनजाते (तुड़ि) इति प्रसिद्धे शब्दे।

**अङ्गुलिषङ्गा** स्त्री अङ्गुलौ सङ्गो यस्याः षत्वम् ७ब०। (याउ) इति प्रसिद्धे अङ्गुलिसंलेपकारके यवागूद्रव्ये।

**अङ्गुलिसंज्ञा** स्त्री अङ्गुल्या संज्ञा संकेतज्ञापनम्। अङ्गुलिचेष्टाभेदेन अभीष्टकर्मणि देये सङ्केतविशेषे "मुखार्पितैकाङ्गुलिसंज्ञयैवेति" कुमा०।

**अङ्गुलिसन्देश** पु० अङ्गुल्या अङ्गुलिध्वनिना सन्दिश्यते सम्+दिश–भावे घञ्। अङ्गुलिध्वनिद्वारा संज्ञादाने।

**अङ्गुलिस्फोटन** न० अङ्गुल्योः स्फोटनं ताड़नं यत्र ७ब०। (तुड़ि) इति प्रसिद्धे अङ्गुलिद्वयमर्दनजाते शब्दे ६त०। अङ्गुलिस्फोटनमात्रे च।

**अङ्गुली** स्त्री अङ्गुलि+वा ङीप्। अङ्गुलिशब्दार्थे"च्युतमपि लब्धपदं यदङ्गुलीष्विति" शकु० "तर्जयन्नङ्गुलीभिरिति"।

**अङ्गुलीपञ्चक** न० अङ्गुलीनां पञ्चकम् पञ्चसंख्या। हस्तस्थानामङ्गुलीनां समुदाये ताश्च अङ्गुष्ठतर्जनीमध्यमानामिका कनिष्ठाः।

**अङ्गुलीय** न० अङ्गुरीयकवत् वा रत्वाभावः। (आंगुटीति) प्रसिद्धे अङ्गुलिभूषणे। "तव सुचरितमङ्गुलीय! नूनमिति" शकु०। इवार्थे कन्। तत्तुल्यपरिणाहवत्त्वात्तत्रैव न०।

**अङ्गुलीसम्भूत** पु० अङ्गुल्यां सम्भूतः ७त०। नखे। अङ्गुलीसम्भूतमात्रे त्रि०।

**अङ्गुल्यादि** पु० ६ब०। पाणिन्युक्ते इवार्थे विहितकन्प्रत्ययनिमित्ते शब्दगणसमूहे। स च गणः "अङ्गुलि भरुज बभ्रु वल्गु मण्डर मण्डल शष्कुली हरि कपि मुनिरुह खल उदश्वित् गोणी उरस् कुलिश इति। अङ्गुलीव+कन् अङ्गुलीयकमित्यादिः।

**अङ्गुष्ठ** पु० अङ्गौ पाणौ प्राधान्येन तिष्ठति स्था–क ७त०